# भूमिका ।

स्वस्ति श्रीमज्जगतीमण्डलमण्डलायमानयशोराशिचन्द्रिकाचिकाशिताखिलविद्वज्जनमानसराजहंसपण्डितावतंसधर्माधिकरणहेमाद्रिविरचितस्य **चतुर्वर्गचिन्तामणेर्यो दानखण्डो** विभागस्तस्य प्रथमे भागो भवादृशानां सदाचारप्रभाधानाविलयशोवतंसभूषितानां विद्वन्मुकुटमणीनां संमुखे लब्धास्पदो विकासयत्येव सर्वेषां हृदयाऽम्बुजकुण्डलमिति । विदितमेव भवद्भिः सर्वतो जघन्ययुगमहिम्ना नितरां तन्निमानमुपयातायां श्रौतविद्यायामत एव लुप्तप्राये यागादिकर्मणि अनेकक्रतुफलदानां तत्तत्षोडशमहादानादीनामुच्चावचानां कर्मणां सम्यगनुष्ठानतो बहुविधमहापातकोपपातकादिपापनाशद्वारा स्वर्गाद्युत्तमलोकफलप्रतिपादक एको दानधर्मः समुज्जृम्भत इति ।

तस्यैव **दानखण्डस्य** द्वितीयोऽयं विभागः सप्तमाष्टमनवमदशमैकादशद्वादशत्रयोदशादिसप्तप्रकरणात्मकोऽतिदानगुडधेन्वाद्यनेकविधदानविधानपरिपूर्णावयवो भवतामसीमकृपया प्राप्स्यति चेत् समक्षपदं तत्सदुर्लभविषयबोधनेन महर्षीणामतीन्द्रियप्रागल्भ्यप्रकटनेन च स्थले स्थले ऽवदातशालिनीं प्रतिभोन्मेषिणीं सहायतामाचरिष्यत्येव ।

अथ चास्य शोधनाविविषयोऽपि पूर्वभागक्रममेवानुसरति । यतः पूर्वभागभूमिकावलोकनदुःखं दृष्टिपथेन स्वीकुर्वतां जनानां पुनस्तदुल्लेखनं पृथैव स्यादिति विविच्य न किञ्चिदत्रलिखितम् ।

अत्र यत्राशुद्धिर्मुद्रायन्त्रालयजा दृष्टिविकारोत्पन्ना वा भ्रान्तेः पुरुषधर्मत्वाद्भवद्भिः सानुग्रहं विबोधिताऽपरावृत्तौ दूरीभविष्यतीति सप्रश्रयमभ्यर्थ्यते ।

मार्गशुक्लप्रतिपदि रवौ

सं. १९५९ ।

विदुषामनुचरः

सदाशिवाचार्यदीक्षितः ।

॥ श्रीः ॥

# हेमाद्रेर्दानखण्डस्य द्वितीयभागस्य

## विषयानुक्रमणिका ।


| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| **अ** | |
| अक्षिरोगहरगरुडदानम् | ७०० । ५ |
| अग्नाविष्णुमूर्त्तिदानम् | ७४१ । ७ |
| अग्निमूर्त्तिदानम् | ७१४ । १७ |
| अग्निष्टिकादानम् | ८५६ । ३ |
| अग्निष्टिकादानवाक्यम् | ८५६ । १४ |
| अग्निहोत्रार्थं गोदातुर्महिमा | ४२७ । २३ |
| अघोरमन्त्रः | ७०६ । ११ |
| अजादानम् | ६७६ । १३ |
| अजादानमन्त्रः | ६७७ । ४ |
| अतिदानविधानम् | ३८१ । २ |
| अतिदानानि | ३८१ । ६ |
| अथर्ववेदभेदाः | ५०२ । १४ |
| अथर्ववेदरूपम् | ५०४ । १७ |
| अनन्तफलदानानि | ८२१ । २ |
| अनन्तफलदान्यारोग्यादीनि | ८२१ । ११ |
| अनेकरत्नपुण्यविधानम् | ६४६ । ७ |
| अन्नदाने सर्वेषामधिकारः | ९०० । ११ |
| अन्नदानम् | ८६० । १२ |
| अन्नप्रशंसा | ८६० । २३ |
| अपस्मारहरगरुडदानम् | ६९८ । ७ |
| अपमृत्युहरहिरण्यगर्भः | ५९८ । ८ |
| अपरतिलपद्मदानम् | ५८२ । १८ |
| अपरहेमपद्मदानविधिः | ४४३ । १० |
| अपराश्वदानविधिः | ५६६ । २१ |
| अपस्मारहरविनायकदानविधिः | ६८० । १ |
| अपात्रगोदानाचरकः | ४२८ । ६ |
| अप्रजायाः कन्याया पत्तेऽभोजनम् | ६५० । २० |
| अप्रयत्नगोदानात्क्रतूत्तमः | ४३६ । १० |
| अभयदानम् | ८६७ । १५ |
| अभ्यङ्गदानम् | ८७४ । ६ |
| अमावास्यादानम् | ८०२ । १ |
| अर्घ्याघसुवर्णधेनुदानम् | ४१८ । १ |
| अलङ्कारदानम् | ८३० । १८ |
| अल्पवित्तस्य विद्यादानम् | ५३७ । ११ |
| अवान्तरविद्याः | ४९५ । २० |
| अवान्तरविद्यादानफलम् | ४९७ । ११ |
| अश्वत्थदानम् | ६४३ । २ |
| अश्वत्थसेचनम् | ६०८ । ६ |
| अश्वदानविधिः | ५६३ । १४ |
| अश्वदानसंकल्पः | ५६५ । १८ |
| अश्वप्रार्थना | ५६४ । १४; ५६६ । २ |
| अश्वमाहात्म्यम् | ५६३ । १७ |
| अश्वमेधतुल्यमश्वदानम् | ५६५ । ३ |
| अश्वालङ्कारः | ५६४ । १०; ५६५ । ५ |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| अश्वदानम् | ७२५ । २३ |
| अश्वमूर्त्तिलक्षणम् | ७२६ । १७ |
| अष्टमप्रकरणम् | ५४३ । १ |
| अष्टमीदानम् | ७६० । १३ |
| अष्टरुद्रनामानि | ७४५ । ६ |
| अष्टविधविवाहव्यवस्था | ६४५ । १६ |
| अष्टविधविवाहाः | ६४५ । १७ |
| अष्टादशपुराणानि | ५१२ । १ |
| असाहृधेनुदानम् | ४५७ । १६ |
| अहङ्कारदानम् | ५६६ । १२ |
| **आ** | |
| आत्मप्रतिकृतिदानम् | ७२४ । ५ |
| आत्मविक्रयं कृत्वाऽपि गोदानम् | ४२५ । १५ |
| आत्मविद्यादानम् | ४६७ । ७ |
| आनन्दनिधिदानम् | ५५६ । १ |
| आपाकदानम् | ८५४ । १ |
| आपाकदानमन्त्रः | ८५७ । १ |
| आपाकदानवाक्यम् | ८५७ । ६ |
| आमान्नदानम् | ६०२ । ६ |
| आम्रतरुदानम् | ६४५ । १७ |
| आयुर्वेददानफलम् | ४६६ । २४<br>४६७ । ११ |
| आयुष्करदानम् | ७३६ । १४ |
| आरामकृतिः | ६४७ । ७ |
| आरामप्रशस्तवृक्षाः | ६४८ । ८ |
| आरोग्यदानम् | ८२१ । १५ |
| आरोग्यशालास्थापनम् | ८२२ । १३ |
| आश्रयदानम् | ६२६ । ६ |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| आसनदानम् | ८४१ । २१ |
| आसुरादिविवाहलक्षणम् | ६४७ । १८ |
| **उ** | |
| उदकदानम् | ६०३ । १० |
| उदकुम्भदानम् | ७१६ । ४ |
| उपपुराणानि | ५१२ । १ |
| उपवेदाः | ५०३ । २१ |
| उपाङ्गानि | ५०१ । ११ |
| उभयमुखीगोदानफलम् | ४५३ । ८<br>४६६ । ६ |
| उभयमुखीदानम् | ४६१ । ८ |
| उमामहेशदानम् | ७०१ । १० |
| उमाशङ्कररूपम् | ६७३ । १६ |
| उष्णीषदानम् | ८२६ । १३ |
| **ऊ** | |
| ऊर्णापटदानम् | ८३६ । २२ |
| **ऋ** | |
| ऋग्वेदादीनां गोत्रदेवाः | ५०४ । २ |
| ऋग्वेदभेदाः | ५०० । ११ |
| ऋग्वेदरूपम् | ५०४ । ७ |
| ऋतुदानानि | ८१६ । ३ |
| **ए** | |
| एकादशप्रकरणम् | ६७६ । १ |
| एकादशरुद्राः | ५६७ । २४ |
| एकादशीदानम् | ७६१ । २३ |
| **ऐ** | |
| ऐष्टकमयमयादिगृहदाने फलम् | ६१४ । ५<br>६१५ । १६ |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| **औ** | |
| औषधदानमहिमा | ८२१ । १८ |
| **क** | |
| कथं लब्धाया गोर्दानम् | ४४५ । १२ |
| कटकीदानम् | ६४१ । २१ |
| कन्यादानम् | ५४० । १६ |
| कन्यादानमाहात्म्यम् | ५४० । १२ |
| कन्यादानवाक्यम् | ६४८ । ६ |
| कन्यादानेऽधिकारिणः | ६४४ । १७ |
| कन्यादानेन स्वर्गप्राप्तिः | ६४१ । ६ |
| कन्यालक्षणानि | ६४४ । ६ |
| कपिलागोदानम् (कूर्मपु०) | ४४६ । १२ |
| कपिलागोदानमन्त्रः | ४४६ । ८ |
| कपिलागोदानविधिः | ४३८ । १ |
| कपिला सहस्रगोतुल्या | ४४८ । ६ |
| करकदानम् | ६०६ । १० |
| करपात्रदानानि | ८१४ । ४ |
| करपत्रिकादानानि | ६०६ । ७ |
| कर्पूरधेनुदानफलम् | ४१४ । १७ |
| कर्पूरधेनुदानम् | ४१३ । ११ |
| कर्पूरधेनुदानमन्त्रः | ४१४ । ५ |
| कलाविद्यादानम् | ४६४ । २० |
| कल्पदानम् | ७८३ । १ |
| कांस्यपात्रदानविधिः | ५३४ । ६ |
| कामलारोगहरगरुडदानम् | ६६८ । १० |
| कार्पासधेनुदानफलम् | ४११ । ११ |
| कार्पासधेनुदानम् | ४१० । १८ |
| कार्पासधेनुदानमन्त्रः | ४११ । ६ |
| कार्श्यहरकद्रुमूर्तिदानम् | ७०२ । १० |
| कालचक्रदानम् | ७१७ । १६ |
| कालपुरुषदानम् | ७१५ । ६ |
| कालविशेषेण दानविशेषाः | ८८५ । २ |
| कीदृशाय गोर्न दातव्या | ४२८ । २० |
| कीदृश्या गोर्दानमयुक्तम् | ४२६ । ६ |
| कुमारलक्षणम् | ७८६ । २२ |
| कुष्ठहरकश्यपरूपदानं चतुर्थम् | ४७७ । ४ |
| कुष्ठहरकश्यपरूपदानं तृतीयम् | ४७६ । १३ |
| कुष्ठहरकश्यपरूपदानम् (वायुपु०) | ४७४ । ४ |
| कुष्ठहरकश्यपरूपदानमपरम् | ४७५ । ६ |
| कुष्ठहरसूर्यमूर्तिदानम् | ७१३ । ११ |
| कूपनिर्माणविधिः | ६१४ । १६ |
| कृषिविद्यादानफलम् | ४६६ । २२<br>४६७ । १३ |
| कृष्णचतुर्दश्यां मिश्राशनादि | ७६६ । १६ |
| कृष्णमूर्तिलक्षणम् | ८०४ । १३ |
| कृष्णाजिनयज्ञोत्पत्तिः | ६६० । ३<br>६६२ । २२ |
| कृष्णाजिनदानकालः | ६६७ । १४ |
| कृष्णाजिनदानप्रशंसा | ६५५ । ७ |
| कृष्णाजिनदानवाक्यम् | ६४६ । १८ |
| कृष्णाजिनदानानि | ६५५ । २ |
| कृष्णादिवर्णविशेषेण दानविशेषकथनम् | ४४४ । २२ |
| क्षयरोगहरतिलपद्मदानम् | ५८६ । ३ |
| क्षीरधेनुदानफलम् | ४०३ । २३ |
| क्षीरधेनुदानम् | ४०२ । १५ |
| क्षीरधेनुदानमन्त्रः | ४०३ । १५ |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| **ग** | |
| गजदानम् | ६०१ । २ |
| गजदानम् ( लिङ्गपु० ) | ६०१ । १३ |
| गजदानवाक्यम् | ६०३ । ७ |
| गजप्रत्याम्नायः | ६०१ । ३ |
| गवोश्वदानम् | ७६८ । १<br>७८१ । ११ |
| गणेशप्रतिमालक्षणम् | ५६२ । १४ |
| गन्धदानम् | ८४५ । १ |
| गरुडगायत्री | ६६८ । १ |
| गरुडदानम् | ६६७ । ११ |
| गरुडमूर्त्तिः | ७६३ । ४ |
| गर्भाधानचूडायज्ञोपवीतदानम् | ८७७ । २१ |
| गजगवाश्वदासदानम् | ८२६ । १८ |
| गलन्तिकादानम् | ६०८ । १५ |
| गवामङ्गे सर्वदेवताः | ४९३ । २ |
| गीतवाद्यादिदानम् | ८४७ । ५ |
| गुडधेनौ गुडप्रमाणम् | ३८२ । १२ |
| गुडधेनुदानफलम् | ३८५ । १३ |
| गुडधेनुदानम् | ३८२ । ४ |
| गुडधेनुदानवाक्यम् | ३८३ । ७ |
| गुडधेनुवत् सर्वासां विधानम् | ३८४ । ३ |
| गुडधेन्वादिकालाः | ३८५ । ६ |
| गृहदानम् | ८१२ । १७ |
| गृहदानमन्त्रः | ६२४ । १७ |
| गृहदानफलम् | ६१३ । १<br>६२७ । ३ |
| गृहदानवाक्यम् | ६२४ । ६ |
| गोचर्मदानम् | ६२६ । १३ |
| गोप्रसवदानफलम् | ८८१ । २ |
| गोकर्णमानकथनम् | ४८८ । ३ |
| गोदानप्रशंसा | ४२७ । ४<br>४५१ । २४ |
| गोदानदक्षिणा | ४४१ । १ |
| गोदानमन्त्रः | ४३६ । १५ |
| गोदानविधिः | ४३० । ६<br>४५० । ६ |
| गोनमस्कारमन्त्रः | ८८० । १० |
| गोपरिचर्या | ८८० । १ |
| गोपालमूर्त्तिदानम् | ६६१ । ५ |
| गोप्रदक्षिणा | ८८० । ५<br>८८८ । २१ |
| गोप्रशंसा | ४२२ । ११<br>४२१ । ६<br>४२४ । २३ |
| गोमतीविद्या | ३८८ । ५<br>४१६ । २३ |
| गोलवणदानम् | ८८० । २१ |
| गोशकृत्प्रशंसा | ४२३ । ६ |
| गोस्तुतिः | ४५५ । ११ |
| गोपदकम् | ८८० । १० |
| ग्रन्थकर्तृप्रशंसा | ६६० । २० |
| ग्रहणोद्भवधेनुदानमन्त्रः | ४५७ । १८ |
| ग्रहणोद्भवधेनुदानविधिः | ४५७ । ६ |
| ग्रहदानम् | ७४६ । १० |
| ग्रहप्रार्थना | ७४८ । ७ |
| **घ** | |
| घण्टादानम् | ६८६ । ११ |
| घृतधेनुदानमन्त्रः | ३६३ । २४ |

# विषयानुक्रमणिका ।


| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| घृतधेनुदानमाहात्म्यम् | ३९५ । ११ |
| घृतधेनुदानविधिः (देवीपु०) | ३९४ । २१ |
| घृतधेनुदानविधिः (विष्णुध०) | ३९२ । १६ |
| घृतधेनुदानविधिः (आदिपु०) | ३९६ । ७ |
| घृतादिधेनुफलम् (कात्या०) | ३९० । २० |
| घृतार्चिर्देवतामन्त्रः | ३९२ । २३ |
| **च** | |
| चतुर्थीदानम् | ७९६ । ६ |
| चतुर्वेदविद्या | ५९५ । १५ |
| चतुर्दशीदानम् | ७९६ । ६ |
| चतुर्मूर्तिदानम् | ७३० । १० |
| चत्वारो वेदाः | ५०० । १० |
| चन्द्रसूर्यदानम् | ७२७ । ४ |
| चामरदानम् | ८४३ । १८ |
| **छ** | |
| छत्रोपानहदानम् | ८४८ । ३ |
| **ज** | |
| जलधेनुदानम् | ३९८ । १३ |
| जलधेनुदानम् (आदित्यपु०) | ४०० । ४ |
| जलधेनुदानम् (देवीपु०) | ४०१ । १ |
| जलधेनुदानम् (स्कन्दपु०) | ४०१ । १७ |
| जलधेनुदानफलम् | ३९९ । २४ |
| जलधेनुदानमन्त्रः | ३९९ । ६ |
| जलाशयनिर्माणम् | ६१७ । १६ |
| **त** | |
| तडागनिर्माणम् | ६१० । १३ |
| तडागादिप्रतिष्ठा | ६२५ । २३ |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| तप्तपीतकृच्छ्रम् | ८८६ । २० |
| तत्पुत्रविधिः | ६५५ । १ |
| ताम्बूलदानम् | ८४५ । १८ |
| तर्कविद्यादानम् | ४९३ । २ |
| तिथिदानानि | ७८५ । ९ |
| तिलकरकदानविधिः | ५६५ । १७ |
| तिलकुम्भदानविधिः | ५६५ । १ |
| तिलगर्भदानफलम् | ६०० । ८ |
| तिलगर्भदानविधिः | ५९८ । ५ |
| तिलदानकालः | ५६६ । १ |
| तिलदानम् | ५६८ । ३ |
| तिलदानं प्रति यमब्राह्मणकथा | ५७० । १० |
| तिलदानवाक्यम् | ५७३ । ७ |
| तिलधेनुदानफलम् | ३८७ । ६<br>(३८८क)१३ |
| तिलधेनुदानम् | ३८५ । १८ |
| तिलधेनुदानम् (अग्निपु०) | ३८७ । ५ |
| तिलधेनुदानम् (आदित्यपु०) | (३८८ख)१२ |
| तिलधेनुदानम् (देवीपु०) | (३८८ख) । ८ |
| तिलधेनुदानम् (विष्णुपु०) | ३८६ । १ |
| तिलधेनुदानेन ब्रह्महत्याविनाशः | ३८५ । २२ |
| तिलधेन्वादिलक्षणम् | ३८६ । ८<br>(३८८क) । ३ |
| तिलपद्मदानम् | ५७६ । २१ |
| तिलपद्मदानम् (द्वितीयम्) | ५८४ । ६ |
| तिलपद्मदानमन्त्राः | ५८५ । २० |
| तिलपात्रदानविधिः | ५७३ । १६ |
| तिलपीठदानविधिः | ५९३ । १० |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| तिलमृगदानविधिः | ५७२ । १६ |
| तिलराशिदानविधिः | ५७६ । १ |
| तिलादर्शदानविधिः | ५६४ । ५ |
| तिलाब्जकदानविधिः | ५६१ । १० |
| तिलोत्पत्तिः | ५४५ । ५ |
| तृतीयादानम् | ७७७ । १ |
| त्रयोदशप्रकरणम् | ८३१ । १ |
| त्रयोदशीदानम् | ७६५ । १४ |
| त्रिपुरुषदानविधिः | ७४३ । ६ |
| त्रिमूर्त्तिदानम् | ७३१ । ९ |
| त्रिसन्ध्याख्याः | ७८३ । ४ |
| त्रिरात्रगोदानविधिः | ४५४ । १५ |
| **द** | |
| दक्षिणामूर्त्तिदानम् | ७०३ । १४ |
| दद्रुरोगशर्तितलपक्वदानम् | ५९७ । १६ |
| दधिदानफलम् | ४०३ । १० |
| दधिधेनुदानम् | ४०४ । १० |
| दर्पणदानम् | ८५९ । १० |
| दशदानवस्तुनिर्देशः | ५४३ । ७ |
| दशधेनुनामानि | ३८१ । १२ |
| दशमप्रकरणम् | ६५५ । १ |
| दशमीदानम् | ७६१ । ८ |
| दशावतारदानम् | ७५० । १२ |
| दशावतारमूर्त्तिलक्षणम् | ७५० । १३ |
| दानानर्हा गावः | ४२६ । १४ |
| दासीदानम् | ६०७ । ३ |
| दासीदानवाक्यम् | ६०८ । ७ |
| दासीवयोविचारः | ६०८ । १२ |
| दास्यन्वितरथप्रशंसा | ६०७ । ८ |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| दिग्दानम् | ७४० । ३ |
| दिनदानम् | ७६९ । ११ |
| दिग्विशेषेण वृक्षाः | ६४७ । १२ |
| दीपदानम् | ८६१ । १० |
| दीपमालादानम् | ८६३ । १६ |
| देवतादानानि | ६७६ । २ |
| देवताभ्यो गजदानम् | ६०५ । १६ |
| देवताभ्यो गोदानम् | ४५४ । १८ |
| देवतोद्देशेन गोदानम् | ४५० । १ |
| द्यूतजितधनेन गोदानम् | ४८५ । २१ |
| द्वादशप्रकरणम् | ७८५ । १ |
| द्वादशादित्यदानम् | ७४८ । १८ |
| द्वादशादित्यनामानि | ७४७ । १७ |
| द्वादशीदानम् | ७६२ । १६ |
| द्वारबन्धः | ६१६ । १४ |
| द्विजस्थापनम् | ६५२ । ११ |
| द्वितीयादानम् | ७८६ । १३ |
| **ध** | |
| धनदमूर्त्तिदानम् | ७३१ । ६ |
| धर्मघटदानम् | ६०१ । ३ |
| धर्मशास्त्रदानफलम् | ५६५ । ११; ५६७ । ४ |
| धर्मशास्त्रदानम् | ५०८ । १ |
| धर्मशास्त्रप्रणेतारः | ५०८ । १७ |
| ध्वजपात्रदानम् | ७३८ । २० |
| **न** | |
| नक्षत्रदानानि | ८०८ । १४ |
| नरसिंहदानम् | ६६४ । १६ |
| नरसिंहरूपम् | ६६४ । २१ |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| नवनीतधेनुदानम् | ३६७ । ११ |
| नवमप्रकरणम् | ४०१ । १ |
| नवमीदानम् | ७६० । २० |
| नागदानम् | ७४२ । ११ |
| नाडीजङ्घराघवस्यदानम् | ६७४ । ६ |
| नानागोदानविधिः | ४४४ । २१ |
| नारायणदानम् | ६६० । १ |
| निम्बाम्रदानम् | ६४० । ३ |
| नित्यसुवर्णदानविधिः | ५५१ । २० |
| निधिकुम्भदानफलम् | ४८५ । १४ |
| निवर्तनमानम् | ४८८ । ५ |
| नीरोगीकरणे महाफलम् | ८४३ । ५ |
| नैगमेयादिलक्षणम् | ५६६ । २१ |
| न्यग्रोधदानम् | ६४३ । १४ |

प

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| पञ्चगव्यमाहात्म्यम् | ८८६ । १३ |
| पञ्चदशतत्त्वानि | ७६० । २१ |
| पञ्चदैवत्यदानम् | ७४० । १६ |
| पञ्चधेनुदानविधिः | ३८८ । ४ |
| पञ्चभङ्गाः | ६३१ । २१ |
| पञ्चमीदानम् | ७८६ । १४ |
| पञ्चमूर्त्तिदानम् | ७३७ । १३ |
| पशुदानम् | ७०६ । २२ |
| परिशिष्टम् | ५०१ । १४ |
| पात्रदानम् | ८५१ । १ |
| पादप्रस्वेदसुवर्णधेनुदानम् | ४३० । ८ |
| पादाभ्यङ्गदानम् | ८०५ । ११ |
| पान्थशुश्रूषा | ८७२ । १ |
| पापरोगहरशयसमानदानम् | ३५५ । ६ |
| पिप्पलः पुत्रशततुल्यः | ६३८ । १५ |
| पुराणदानम् | ५१० । २० |
| पुराणप्रधानता | ५११ । १ |
| पुराणलक्षणम् | ५१३ । १८<br>५१४ । १७ |
| पुराणश्रवणदानम् | ५२१ । ८ |
| पुराणसंख्या | ५१५ । २२ |
| पुराणानि | ५१२ । १ |
| पुष्पदानम् | ८४६ । ८ |
| पुस्तकलेखनविधिः | ५२८ । १४ |
| पुस्तकाधारः | ५२८ । १६ |
| प्रतिपदादिषु फलादिदानम् | ७८५ । १० |
| प्रतिपद्दानम् | ७८६ । ५ |
| प्रतिपुराणदानकालादिः | ५०६ । ३ |
| प्रतिपौर्णमासीषु विशेषः | ७६० । ७<br>८०० । १५ |
| प्रतिमासीयद्वादशीदानम् | ७६३ । १ |
| प्रतिश्रयः | ६३६ । ८ |
| प्रतिश्रये देवतास्थापनम् | ६३६ । १७ |
| प्रत्यक्षगोदानम् | ४२२ । ६ |
| प्रत्येकरत्नदानम् | ८२७ । १६ |
| प्रपादानम् | ६११ । ३ |
| प्रपादानवाक्यम् | ६१३ । १७ |
| प्रसेनहरसुवर्णधेनुदानविधिः | ४१७ । ८ |
| प्राजापत्यविवाहः | ६६७ । ११ |

ब

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| बन्ध्यात्वहरसुवर्णधेनुदानम् | ४१६ । १ |
| बहुक्षीरिणीगोदानफलम् | ४०५ । ८ |
| ब्रह्मविष्णुमहेश्वरदानम् | ७२६ । १४ |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| मृगदानम् | ६६७ । १६ |
| मृत्युञ्जयन्यासाः | ५९९ । ५ |
| मेषीदानम् | ६७५ । ६ |
| **य** | |
| यजुर्वेदभेदाः | ५०० । २१ |
| यजुर्वेदरूपम् | ५०३ । १० |
| यज्ञोपवीतदानम् | ८७६ । ४ |
| यत्यादिस्थापनम् | ८७६ । १३ |
| यमदानम् | ६१८ । १३ |
| यष्टिदानम् | ७७८ । १७ |
| याज्ञिकवेशव्यवस्था | ६५६ । १७ |
| युगादितिथयः | ८०३ । ४ |
| युगादितिथिदानम् | ८०२ । १६ |
| योगदानानि | ८९३ । ८ |
| योनिमन्त्रः | ५९९ । ३ |
| **र** | |
| रत्नशृङ्गयै तिलपद्मदानम् | ५८६ । ११ |
| रजतदानविधिः | ५६३ । ४ |
| रत्नदानम् | ८३७ । १ |
| रथदानम् | ६०६ । १३ |
| रथदानवाक्यम् | ६०६ । २० |
| रसधेनुदानम् | ४०७ । १६ |
| राजस्थापनम् | ६५३ । २१ |
| राज्ञीदेवीरूपम् | ८४१ । १४ |
| रामायणदानम् | ५२० । १७<br>४९८ । ८ |
| रुक्मादिपात्रदानम् | ८५१ । १७ |
| रुद्रगायत्री | ७०२ । ५ |
| रुद्राष्टकदानम् | ७४५ । १ |
| रुद्राष्टमूर्तयः | ७२७ । ८ |
| रुद्रैकादशतिलदानविधिः | ५६७ । १३ |
| रुद्रैकादशवस्त्रदानविधिः | ८३३ । २० |
| रोगनामानि | ८५४ । ८ |
| रोगहरदानानि | ८७५ । ९ |
| **ल** | |
| लक्ष्मीदानम् | ६८७ । ४ |
| लक्ष्मीनारायणदानम् | ६९६ । ७ |
| लक्ष्मीनारायणरूपम् | ६९६ । ६ |
| लवणधेनुदानम् | ४११ । १६ |
| लवणधेनुदानमन्त्रः | ४१२ । २१ |
| लवणधेनुफलम् | ४१२ । ३ |
| लवणाद्रिदानफलम् | ८५८ । १३ |
| लेखकः कीदृशः | ५२५ । २१<br>५२६ । १० |
| लोकपालदानविधिः | ७४३ । १५ |
| लोकपालाष्टकदानम् | ७४१ । १८ |
| **व** | |
| वडवादानफलम् | ५६६ । १० |
| वराहदानम् | ६५३ । ११ |
| वर्णनीयकथा | ६४४ । १६ |
| वस्त्रदानम् | ८३१ । १६ |
| वाचकलक्षणम् | ५३१ । १६ |
| वापीनिर्माणम् | ६१६ । १० |
| वामादिरुद्राः | ७६६ । १६ |
| वामादिलक्षणम् | ५८४ । १ |
| वामादिशान्तयः | ५८३ । १६ |
| वारदानानि | ८०६ । ६ |
| वारुणेष्टिः | ६३४ । ४ |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| वास्तुचक्रम् | ६१६ । ६ |
| वास्तुदेवताः | ६१० । २ |
| वास्तुलक्षणम् | ६१६ । ४ |
| वास्तुधर्मविशेषाः | ६१६ । ४ |
| विशेषदानविधिः | ८८२ । १० |
| विशेषनामानि | ७६१ । १६ |
| विशेषलक्षणम् | ७६३ । ६ |
| वितानदानम् | ८३४ । ८ |
| विद्याङ्गः सर्वदः | ४६४ । ६ |
| विद्यादानप्रशंसा | ४६३ । १६ |
| विद्यादानम् | ४६३ । ७<br>५३१ । २४ |
| विद्यादानं सर्वदानाधिकम् | ४६७ । ८ |
| विद्यंभरः | ५०० । २० |
| विधिवद्दत्ता गौः कुलानि तारयति | ४३८ । १ |
| विनायकगायत्री | ७८१ । ६ |
| विनायकदानविधिः | ६०६ । ६ |
| विश्वेदेवनामानि | ७५४ । १६ |
| विश्वामरदानम् | ७५६ । १४ |
| विष्णवे रत्नदानम् | ६०६ । ३ |
| विष्णुगायत्री | ७२० । ६<br>६८८ । २३ |
| वृषदानम् | ६४० । ११ |
| वृषदोषदानानि | ६४६ । १० |
| वृषपञ्चकोत्पत्तिफलम् | ६५२ । १८ |
| वृषप्रतिष्ठा | ६५६ । ३<br>६५७ । १८ |
| वृषपालना | ४६८ । ११ |
| वृषव्याधिचिकित्सा | ६४८ । २३ |
| वृषाम्नायम् | ६४८ । १६ |
| वृषारोपणम् | ६३७ । १५ |
| वृषारोपणमहिमा | ६३७ । १६ |
| वृषः कीदृशो देयः | ४६८ । ४ |
| वृषगायत्री | ६७० । १ |
| वृषभदानफलम् | ४६६ । १३<br>४६८ । १४ |
| वृषभदानम् | ४६५ । १५ |
| वृषभाधिकगोसमदानम् | ४५३ । २२ |
| वृषभैकादशगोदानम् | ४५३ । १२ |
| वृषभोत्पत्तिः | ४६५ । १६ |
| वृषो दशधेनुसमः | ४६८ । २ |
| वेददानप्रशंसा | ४६८ । १४ |
| वेददानम् | ४६८ । १३<br>५०५ । १ |
| वेदपूजनमन्त्रः | ५०५ । १६ |
| वेदविद्यादानफलम् | ४६७ । ६ |
| वेदवक्त्रादि | ५०० । १ |
| वेदादिविद्यादानफलम् | ४६१ । ३ |
| वेदाध्ययनफलम् | ५०६ । १० |
| वेदाध्यापनविधिः | ५०६ । ७ |
| वैतरणीगोदानफलम् | ४५८ । १३ |
| वैतरणीगोदानम् | ४५८ । १२ |
| वैतरणीगोदानमन्त्राः | ४५८ । १६<br>४६० । १५ |
| वैतरणीनदीस्वरूपम् | ४५८ । ४ |
| वैतरणीं धार्मिकास्तरन्ति | ४५६ । १० |
| वैतरणपथगुप्तमन्त्रः | ४६१ । २१ |
| वैतरण्यामवैश्यस्याप्यधिकारः | ४५८ । १६ |
| वैतरणार्थं कीदृशी गौः | ४६० । १५ |

| विषयाः । | पृष्ठे । पङ्क्तौ |
|---|---|
| वैद्यभवनम् | ८७७ । ११ |
| वैशाखशुक्लतृतीया | ७८७ । १२<br>७८८ । १२ |
| व्यञ्जनदानम् | ८४२ । २३ |
| व्यतीपातसंक्रान्तिदानम् | ८२६ । ६ |
| व्रतग्रहणविधिः | ६०४ । १६ |
| व्रणबन्धदानम् | ८२८ । ३१ |
| **श** | |
| शतमानदानविधिः | ५१४ । १० |
| शय्यादानम् | ८३७ । १२ |
| शय्यादानमन्त्रः | ८४० । ३ |
| शय्यागतद्रव्यभेदाः | ८४० । १५ |
| शर्कराधेनुदानफलम् | ४१० । १२ |
| शर्कराधेनुदानम् | ४०६ । १ |
| शालदानफलम् | ५३४ । २१<br>५३७ । ५<br>५४० । १४ |
| शास्त्रदानम् | ५०७ । १३<br>५२४ । ६ |
| शिरोरोगभयज्ञोपवीतदानम् | ७७७ । १३ |
| शिल्पविद्यादानफलम् | ४६६ । १६ |
| शिवमठदानम् | ६०१ । १० |
| शिवदासीदानम् | ६०६ । ७ |
| शिवभूमिदानम् | ५६७ । १६ |
| शिवसुवर्णदानम् | ५५३ । १३ |
| शिवाश्वत्थदानम् | ५६७ । २८ |
| शिबिकादानम् | ६११ । ८ |
| शूद्रदानम् | ७०८ । १० |
| शूलरोगहरशूलदानविधिः | ७१० । ६ |
| शोकहरकलशदानम् | ८३५ । ७ |
| श्रावणशुक्लद्वादश्यां गोदानम् | ७६५ । १० |
| श्रीवृक्षदानम् | ४३३ । २ |
| श्रोत्रियदानमहिमा | ४३८ । ६ |
| श्वेताश्वदानम् | ५६७ । २४ |
| **ष** | |
| षडङ्गानि | ५०१ । १० |
| षष्टीदानम् | ७८६ । २० |
| **स** | |
| संवत्सरदानानि | ८५० । ५ |
| संक्रान्तिदानानि | ८१५ । १४ |
| सकृदार्जितदानमहिमा | ४३५ । १० |
| सप्तमप्रकरणम् | ३८१ । १ |
| सप्तमीदानम् | ७६० । ८ |
| सप्तव्रीहिधेनुदानफलम् | ३६२ । ११ |
| सप्तव्रीहिधेनुदानविधिः | ३६२ । ५ |
| समानवत्सगोदानम् | ४४६ । १४ |
| सम्यक्करदानम् | ७४६ । २ |
| सरस्वतीदानम् | ८८३ । ३१ |
| सर्वगोदानसाधारणमन्त्रः | ४४० । १५ |
| साध्यदानम् | ७५५ । ११ |
| सामवेदभेदाः | ५०३ । २ |
| सामवेदरूपम् | ५०४ । १३ |
| सुवर्णदानम् | ५४३ । १५ |
| सुवर्णदानप्रयोगः | ५५१ । ४ |
| सुवर्णदानफलम् | ५४७ । ५ |
| सुवर्णधेनुदानफलम् | ४१५ । १८ |
| सुवर्णधेनुदानम् | ४१४ । १६ |
| सुवर्णधेनुदानम् (देवीपु०) | ४१६ । ४ |
| सुवर्णधेनुदानम् (अग्निपु०) | ४१६ । २१ |

शृणुयात् श्रद्धया शुक्ः प्रयतोऽभिमुखो गुरोः ॥
अनन्यसत्कथाक्षेपी निष्प्रमादो ह्यतन्द्रितः ।
बुधश्च संशये जाते पृच्छेद्वाक्यमुदीरयेत् ॥
गुरुणा चोक्तमेकान्ते श्रद्धावान् वाक्यमाश्रयेत् ॥
एतत्कृतं स्वयं कुर्यात् ससमिद्ब्रह्मपञ्जलान्वितः ।

कृतं गुरुचेष्टितम् ।

अप्रस्तुतकथाक्षेपं यः कुर्यादग्रतो गुरोः ॥
स ब्रह्महत्यामाप्नोति गुरुवाक्येष्वनिश्चयः ।
यश्च श्रुत्वाऽन्यतः शास्त्रं संस्कारं प्राप्य वाऽशुभम् ॥
अन्यस्य जनयेत् कीर्त्तिं स गुरोर्ब्रह्महा भवेत् ।
विस्मारयेच्च व्यामोहाद्योऽपि शास्त्रार्थमुत्तमम् ॥
स याति नरकं घोरमक्षयं भीमदर्शनम् ।
यस्तु बुद्ध्वा नरः शास्त्रं किञ्चित् कुर्यात् शुभाशुभम् ॥
भवेच्छतगुणं तद्वै विज्ञानेभ्यो रतस्य च ।
एवं विधानतो वाच्यं वाचकेन विपश्चिता ॥
तपः समात्मकं सर्वं स्वर्गादिफलसाधकम् ।
ज्ञानैर्वैबोध्य वै वाच्यमध्यात्मादि च यद्भवेत् ॥
क्रुद्धोक्तियुद्धसंक्षोभं धारावर्त्तेन वाचयेत् ।

धारावर्त्तेन वेगेन ।

स्वरागं ललितैर्वाक्यैर्वाचयेद्बुधसङ्गमे ॥
नानावृत्तानुरूपेण लालित्येन च वाचयेत् ।
सर्गाध्याये समाप्ते च कथापर्यन्त एव वा ॥
प्रशब्दशब्दसंयोगे कुर्यादिति विरामणम् ।
समाप्ते वाचके भीष्म प्रथादेवं विचक्षणः ॥

अथ ब्रह्मवैवर्त्ते ।

कारयित्वा गृहान् रम्यान् ऋतुवत्सरसंख्यया ।
भुवनाष्टादशत्रिंशत् नक्षत्रसंख्यया ॥
शक्त्या तद्द्विगुणानेव शतं यावत् सहस्रकम् ।
कुड्यस्तम्भगवाक्षाढ्यान् विचित्रान् बहुभूमिकान् ॥
सप्राकारप्रतोलीकान् कपाटार्गलयन्त्रकान् ।
सुधाधवलितान् रम्यान् विस्तीर्णाङ्गणवाटकान् ॥
सप्तधातुमयैर्भाण्डैः पञ्चरत्नैः समन्वितैः ।
चर्मकाष्ठमयैर्हस्तिदन्तवत्कलमयैस्तथा ॥
मृण्मयोपस्काराकीर्णान् वस्त्रोपकरणान्वितान् ।
सर्वोपस्करसम्भारशणवल्कलराजितान् ॥
राजितांस्तृणपाषाणैः काष्ठसञ्चयसंयुतान् ।
सर्वधान्यसमायुक्तैः कुशूलैश्च विराजितान् ॥
गोमहिष्यश्ववृषभप्रेष्यदासीजनान्वितान् ।
क्षेत्रारामजलासन्नान् दृढान् हर्म्यवरान् शुभान् ॥
सम्पूर्णान् सप्तधान्यैश्च घृततैलगुडादिभिः ।
तिलतण्डुलशालीक्षुमाषगोधूमसर्षपैः ॥
प्रियङ्गुयवनीवारनिष्पावराजमुद्गकैः ।
मसूरचणकावर्त्तसकुष्ठककुलत्थकैः ॥
लवणार्द्रकखर्जूरद्राक्षाजीरकधान्यकैः ।
हिङ्गुकुङ्कुमकर्पूरकस्तूरीद्रव्यैः सचन्दनैः ॥
कन्थोपस्करपर्यङ्कतूलीगण्डोपधानकैः ।
चुल्लीच्छेदनमन्थानभद्रासनकटुस्थकैः ॥
पिठरोदूखलस्थालीसूर्पदर्पणयन्त्रकैः ।

जपेद्वै मूलमन्त्रं तु गायत्रीं वा समाहितः ॥
पाप संचिन्त्य चित्तेन हननं ब्राह्मणस्य तु ।
नाभिमात्रं समुद्धृत्य तिलैः संछादयेत् पुनः ॥
संछादिते पुनर्विप्रे जपेन्मन्त्रं तु पूर्ववत् ।
पुनरुद्धृत्य विप्रं तु नाभिमात्रं तु पार्थिव ॥
पुनः संछादयेत् तस्य शिरः कृष्णैस्तिलैस्तथा ।
त्रिकृत्वस्तु निमज्यैवं दाता दद्यान्मृगाजिनम् ॥
पात्रं मनसि संचिन्त्य तोयमप्सु विनिक्षिपेत् ।
प्रीयतां विश्वकर्मा तु विश्वात्मा विश्वरूपधृक् ॥
एवं कृष्णाजिनं दत्त्वा ब्रह्महत्यां व्यपोहति ।
पापिष्ठः परमं स्थानं याति यत्र न शोचति ॥
इति ते गुह्यमाख्यातं दानं सर्वाघनाशनम् ।
मुण्डितेन तु कृच्छ्राय ब्राह्मणे चालिते सति ॥
सहस्रं दक्षिणां दद्यान्नियतं ब्राह्मणाय तु ।

इति महाकृष्णाजिनदानविधिः ।

अथ कृष्णाजिनप्रसङ्गेन मृगदानमुच्यते । आह बौधायनः ।

हरिणं कारयेत् तात्रं घनं तु दशभिः पलैः ।
तदर्धेन तदर्धेन शृङ्गे रूप्यमये दृढे ॥
तण्डुलोपरि संस्थाप्य ब्राह्मणाय निवेदयेत् ।
आढकत्रितयं वाऽपि तदर्धं वा स्वशक्तितः ॥
पादेषु चतुर्षु स्थाप्य कांस्यपात्रचतुष्टयम् ।
वायुदैवतमन्त्रैश्च होमं तत्र प्रकल्पयेत् ॥
समिदाज्यचरुं कृत्वा शतमष्टोत्तरं द्विज ।

यजमानः शुचिर्भूत्वा देवेशं पूज्य भक्तितः ।
मूलमन्त्रेण च पुनस्तस्मै द्विजवरेऽर्पयेत् ॥
दद्यात् तां देवदेवस्य प्रतिमां शङ्करस्य तु ।
मन्त्रेणानेन विधिवत् प्राङ्मुखाय उदङ्मुखः ॥
देवदेव महेशान वृषभध्वज शङ्कर ।
अज्ञानार्थेन यत् पापं कृतं जन्मान्तरे मया ॥
तेन यज्ञनितं कार्ष्ण्यमलज्ञां मम देहजम् ।
तव दानेन दत्तेन प्रीतोऽस्मि रक्ष पार्थिवम् ॥

दानमन्त्रः ।

एवं यो विधिनाऽनेन शङ्करप्रतिमां नरः ।
ददाति विप्रवर्याय स कार्ष्यात्प्रमुच्यते ॥
पुण्याहवाचनं कृत्वा ब्राह्मणानपि भोजयेत् ।

इति रुद्रमूर्तिदानविधिः ।

## अथ दक्षिणामूर्त्तिदानं वायुपुराणे ।

श्रूयतां परमं गुह्यं दानं सर्वात्समोत्तमम् ।
नमस्कृत्य प्रवक्ष्यामि देवदेवस्य शूलिनः ॥
सर्वेषामेव पापानां येन नाशः प्रजायते ।
पापानां निष्कृतिः प्रोक्ता मुनिभिः शास्त्रदर्शिभिः ॥
तपोहोमजपप्राया सा हि कार्या प्रयत्नतः ।
एतत् तु सर्वपापानां प्रायश्चित्तमनुत्तमम् ॥
महापातकदोषेषु पातके चोपपातके ।
अन्येषामपि दोषाणां निष्कृतिः परिवर्तते ॥
पलत्रयेण देवेशं सुवर्णस्य प्रकल्पयेत् ।
ईशानं दक्षिणामूर्तिं सर्वज्ञं लोकसाक्षिणम् ॥

समञ्जनं प्रकुर्वीत यथा लिङ्गं शरीरके ॥
शक्तो देव्यनुवाकेन शान्तिं कुर्याद्विशेषतः ॥
तस्मै दत्त्वा रोगी यथाशक्तिपुरःसरम् ।
मन्त्रेणानेन विधिवत् प्राङ्मुखाय ह्युदङ्मुखः ॥
आदित्य सूर्य द्युमणे सर्वरोगविनाशक ।
सहस्रकिरणाम्भोजबन्धो तिमिरनाशन ॥
द्वादशात्मँस्त्रयीदेह जगच्चक्षुर्विभाकर ।
पूर्वकर्मविपाकोत्थं कुष्ठमाशु विनाशय ॥

इति सूर्यप्रतिकृतिदानमन्त्रः ।

कदलि सर्वदेवानां मातॄणां सर्वशर्मदे ।
लक्ष्म्या शच्या च पार्वत्या देवकन्याभिरेव च ॥
सावित्र्या रम्भया चैव कार्यार्थं पूजिता पुरा ।
मद्गात्रसम्भूतं सर्वं कुष्ठजातमपानुद ॥

कदलीदानमन्त्रः ।

ततः स्नात्वा च भुञ्जीत ब्राह्मणैर्बन्धुभिः सह ।

इत्यपरसूर्यमूर्तिदानविधिः ।

## अथ वह्निमूर्तिदानम् । तत्र बौधायनः ।

सुवर्णेनाथ ताम्रेण कुर्यात् प्रतिकृतिं बुधः ।
वह्नेर्वैभवसारेण पलेनार्धेन वा पुनः ॥

वह्निलक्षणं तु लोकपालयज्ञे ग्रहयज्ञदाने दर्शितम् ।

तथा ज्वालाकुलां रक्तचन्दनेन विलेपिताम् ।
रक्तवस्त्रेण संवीतां मेषस्योपरि संस्थिताम् ॥
रक्तमाल्यैस्तु सञ्छन्नां मुक्तादामपरिष्कृताम् ।
कनकाचलवर्णाभां द्वादशार्कनिभां शुभाम् ॥

सद्योजातादिमन्त्रचतुष्कं लिङ्गपुराणोक्तलिङ्गार्चनविधाने । यत्र ब्राह्मणाः सद्योजा-तादि मन्त्राः तैत्तिरीयाणां प्रसिद्धाः ।

तेनैव विप्रेण च सर्वमेतत् कृत्वैव दानं स्वयमेव कुर्यात् ।

दानकाले तु संप्राप्ते दाता भार्या नरोऽथ वा ।
स्नापितो गुरुणा तेन मन्त्रपूतैः कुशोदकैः ॥
अभ्यर्च्य विप्रं गन्धाद्यैर्मन्त्रानेतानुदीरयेत् ।
प्रत्येकमेका धारया देवमूर्तिरनुक्रमात् ॥
नमोऽस्तु सद्योजाताय भवाय भवभञ्जिने ।
भवभङ्गो भवेन्मह्यं तव रूपप्रदानतः ॥
सोमाय वामदेवाय शिवाय शिवरूपिणे ।
सदा मे शिवमेवास्तु तव रूपप्रदानतः ॥
नमोऽघोराय घोराय जगत्संहृतिकर्मणे ।
शरण्यं त्वां प्रपन्नोऽहमशङ्कं मम शं कुरु ॥
पुरुषाय पुराणाय हराय परमाय च ।
तस्य रूपप्रदानान्मे श्रेयसेऽस्तु नमोऽस्तु ते ॥
ईशानो जगतामीशो देवानामभयङ्करः ।
रक्ष त्वं सर्वभूतानामीशो मां शरणं गतम् ॥
त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः ।
प्रणिपत्य ततो दद्यादेभिर्मन्त्रैर्यथाक्रमम् ॥
मध्यमं गुरवे दद्यादन्यस्मै वा प्रदापयेत् ।
दक्षिणां गुरवे दद्यात् सुवर्णं चैव वाससी ॥
एतन्नरोऽथ वा नारी कारयेद् समाचरेत् ।
मुच्यते सर्वपापेभ्यः शिवसायुज्यमाप्नुयात् ॥
इत्येवमृषयो दानं नारदाय चतुर्मुखः ।

यथोवाच तथा प्रोक्तं मया वै पञ्चमूर्त्तिकम् ॥

इति पञ्चमूर्त्तिदानविधिः ।

## अथ दिग्दानं विष्णुधर्मोत्तरे ।

कार्त्तिक्यामग्निदैवे भे विष्णोर्मेषान्तकस्य वा ।
प्राच्यादि कुर्वीत दिशश्चतस्रः पृथिवीयुताः ॥
सौवर्णाश्चैव कर्त्तव्याः पूर्णकुम्भकराः शुभाः ।
गोरूपा पृथिवी कार्या सर्वलक्षणसंयुता ॥
कृत्वा कमलसंस्थानाः सुवर्णद्वितयेन तु ।
पूजयित्वा द्विजान् पञ्च सुवर्णाभरणैस्ततः ॥
ताम्रपात्रं दले कृत्वा कदल्याः पीठसंयुताः ।
यो ददाति प्रयतः स्यात् पृथिवी तेन पार्थिव ॥
पितरः पितृलोकस्था देवलोके दिवौकसः ।
संप्रीणयन्ति तं तुष्टा वसुपुत्रधनेप्सितैः ॥
अमात्यमर्थं भुञ्जीत दद्याद्विधिपूर्वकम् ।

इति दिग्दानविधिः ।

## अथ पञ्चदैवत्यदानं ब्रह्माण्डपुराणे ।

अथ दानं प्रवक्ष्यामि शृण्वन्तु मुनयोऽमलाः ।
पञ्चदैवत्यमित्युक्तं नारदाय स्वयम्भुवा ॥
शरीरारोग्यमायुष्यं श्रीकरं पापनाशनम् ।
यत् कृत्वा पुरुषः स्त्री वा सर्वमायुरवाप्नुयात् ॥
पुण्यकालेषु सर्वेषु जन्मर्क्षेषु विशेषतः ।
पुण्यदेशे गृहे वाऽथ नित्यं वा दानमाचरेत् ॥
दुःस्वप्नाद्भुतदर्शी तु सर्वदोषप्रशान्तये ।

रक्तैर्गन्धैस्तथा धान्यैर्धौतैर्वस्त्रैस्तथैव च ।
कृत्वा चोत्तमथोक्षाणं दत्त्वा दीपं समन्ततः ॥
चन्द्रोदये नरो दत्त्वा सर्वपापैः प्रमुच्यते ।
कान्तारे यममार्गे तु तेनासौ व्रजते सुखम् ॥
प्राप्नोति पुत्रपौत्रांश्च सूर्यलोकं च गच्छति ।
मार्गशीर्षे तथा मासि पूर्णे शिशिरदीधितौ ॥
महारजतरक्तेन वाससा तु महीपते ।
आच्छाद्य कांस्यपात्रे तु कृत्वा सोमं समाहितः ॥

'महारजतरक्तेन' कुसुम्भरक्तेन । कर्तृपदं पात्रस्थानेषु पुरस्तादुच्यते ।

लवणस्य तु मुख्यस्य संपूर्णं कृष्णमार्गकम् ।

'मुख्यस्य लवणस्येति' सैन्धवस्येत्यर्थः ।

दत्त्वा सुवर्णनाभं तु तस्मिन्नेव द्विजातये ।
सौभाग्यरूपलावण्ययुक्तो भवति मानवः ॥
गौरसर्षपकल्केन पौषे उच्छादितो नरः ।

'उच्छादित' उद्वर्तित इत्यर्थः ।

न चाव्रणेन कुम्भेन सोऽभिषिक्तश्च तत्परम् ।
विकङ्कितस्तथा स्नातः सर्वबीजयुतैर्जलैः ॥

'विकङ्कित' चन्दनोत्सन्नेषु ।

गन्धयक्षफलोपेतैर्घृतेन तदनन्तरम् ।
सौवर्णं च ततः कृत्वा तत् प्रदद्याद्विजातये ॥

सुवर्णमध्ये घृतेनाभिषिक्त इत्यन्वयः । 'सर्वाणि' कुम्भादिकं पक्वद्रव्यं परा-
मृश्यते ।

घृतेन स्नापितं विष्णुं शक्त्या संपूजयेत् ततः ।
घृतं च जुहुयाद्वह्नौ घृतं दद्याद्द्विजातये ॥

धान्यं वासो हिरण्यं वा दातव्यानि प्रयत्नतः ।
सुवर्णदानं सर्वेषां रोगाणां शमकारणम् ॥
तस्मात् सर्वप्रयत्नेन दातव्यं कमलोद्भव ।
अक्षिस्रवरोगाणामाज्यं कनकसंयुतम् ॥
पानीयं पायसं मुद्गाः शर्करा घृतसंयुताः ।
सर्वाङ्गतोदकाशेषु लवणं वै सोपबर्हणम् ॥
दद्याद्वै कण्ठरोगाणां कम्बलं कमलोद्भवे ।
तथा च रत्नजैर्यथा शक्त्यनुरूपतः ॥
कृत्वा च प्रतिमां व्याधेर्दद्याद्विप्राय यत्नतः ।
शतेन वा तदर्धेन त्रिंशता निष्कसङ्ख्यया ॥
जातरूपमयं व्याधेः प्रतिरूपं तु कारयेत् ।
निधाय पात्रे संपूर्णे तण्डुलैः शालरूपकैः ॥
अलङ्कृत्य च सौवर्णं रूपं त्वगुरुलेपनैः ।
वासोयुगेन संवेष्ट्य हिरण्यबहुभूषणैः ॥
अलङ्कृताय विप्राय दत्त्वा मन्त्रमुदीरयेत् ।
ये मां रोगाः प्रबाधन्ते देहस्थाः सततं तथा ॥
गृह्णीष्व प्रतिरूपेण तान् रोगान् द्विजसत्तम ।
बाढमित्येव तद्रूपं गृह्णीयाद्व्याधिभिः सह ॥
ततस्त्वरोगी दाता च दीर्घायुश्च प्रपद्यते ।
एवं बहुविधं शान्त्यै रोगाणां कमलासन ॥
कार्यमुक्तं मया तेभ्यः किमन्यत् कथयामि ते ।
एवमुक्तो भगवता ब्रह्मा लोकपितामहः ॥
यदाह नारदायेदं मया तत् सर्वमीरितम् ।

इति रोगहरदानविधिः ।

स दिव्यभोगसंयोगमरोगः सर्वदाऽश्नुते ॥
महाऽऽतपःपरिश्रान्तिधर्मनिर्मूलनक्षमम् ।
न तालवृन्तपवनादपरं नूपरञ्जनम् ॥
परं रम्भोरुसम्भोगसम्भवं स्वेदमेदुरम् ।
हर्तुं श्रमं समर्थंत नान्यद्व्यजनवीजनात् ॥
अतः सदा मुदा युक्तस्तालवृन्तं द्विजातये ।
दद्यादवद्यनिर्मुक्तमुक्तिसंभुक्तिहेतवे ॥

### महाभारते ।

यो ददाति द्विजाग्र्येभ्यो व्यजनं जननन्दनम् ।
स नन्दनवनामोदमोदमानमना दिवि* ॥
वसेदशेषकल्पान्तपर्यन्तमपकल्मषः ।

### विष्णुधर्मोत्तरे ।

प्रदाय व्यजनं शार्ङ्गं वंशे महति जायते ।
चार्मणं कर्मणां सिद्धिं दत्त्वा व्यजनमश्नुते ॥
तथैव दत्ते मायूरे नायुरेतस्य हीयते ।
पात्रेण पुष्टतामेति वाल्केण कौपमल्लभः ॥
व्यजनेनेह दत्तेन तस्मात् तं प्रतिपादयेत् ।

### अथ चामरदानम् । महाभारते ।

यस्तु भक्त्या द्विजाग्र्येभ्यो दद्याच्चामरमुज्ज्वलम् ।
स चौपम्यमवाप्नोति निःशेषावनिमण्डले ॥

### वायुपुराणे ।

चामरं चामरेशाय यः शिवाय निवेदयेत् ।

---

* स नन्दनवनामोदभाजनं मनसा दिवि—इति क्वचित् पाठः ।

भैक्ष्येणान्नं समाहृत्य विप्रेभ्यो यः प्रयच्छति ॥
स्वाध्यायनिरतो विप्रो दत्त्वेह सुखमेधते ।
सर्वोपायं मनुष्येण न्यायेनान्नमुपार्जितम् ॥
कार्यं पात्रगतं नित्यमन्नं हि परमा गतिः ।

तथा ।

कौमुदे शुक्लपक्षे तु योऽन्नदानं करोत्यतः ।
स संतरति दुर्गाणि प्रेत्य चानन्त्यमश्नुते ॥

नन्दिपुराणे ।

अन्नाद्भूतानि जातानि येषां ह्यन्नाभिकाङ्क्षिणः ।
न तस्य पात्रविधिर्विधिना प्रदत्तं प्रकीर्त्तितम् ॥

तथा ।

अपि कीटपतङ्गानां शुनां चाण्डालयोनिनाम् ।
दत्त्वाऽन्नं लोकमाप्नोति प्राजापत्यं समासतः ॥
बान्धवेभ्योऽतिथिभ्योऽन्नं *मित्रेभ्यश्च प्रयच्छताम् ।
दीनान्धकृपणानां च स्वर्गः स्यादकदाचिनाम् ॥
ग्रासमात्रं नरो दत्त्वा भूतानामन्नगृध्नवे ।
स्वर्गे वसेत् समानां तु शतं भोगैर्मनोरमैः ॥
ग्रासे ग्रासे फलं ह्येतद्विधिवत् परिकीर्त्तितम् ।
एतद्दैवाय ते प्रोक्तं द्विगुणं पुण्यगौरवम् ॥
अन्नं विना क्षुधार्त्तस्य दत्त्वाऽन्नं देशकालतः ।
फलं पञ्चगुणं प्रोक्तं सर्वभावसमन्वितम् ॥

दातृभावादिभावसमन्वितमित्यर्थः ।

---

* पतिभ्योऽपीति म॰ प॰ पु॰ पा॰ ।

हेलाख्या च तथा चर्म्म सुखसाध्या प्रकीर्त्तिता ।
उत्तमाधममध्या सा स्वल्पवृद्धा सुखप्रदा ॥
दैर्घ्योच्चबन्धगाधा तु साऽधमा परिकीर्त्तिता ।
शतसहस्रपर्यन्ता छिद्रच्छाऽद्दछिद्रपिण्डिका ॥
द्वारी श्रेष्ठाऽधमा तात बहुबन्धा च या भवेत् ।
सिकतापङ्कसंछिद्रा सप्रजा ? परिवर्जयेत् ॥
शुभाहे दैर्घ्यविस्तारं मित्वा बन्धं समाचरेत् ।
त्रिपञ्च चाष्टपर्यन्तः श्रेष्ठो बन्धः प्रकीर्त्तितः ॥
शतद्वयं शुभा पाली कथिता सप्तधाऽधमा ।
विस्तारः कथितः शास्त्रे पालीबन्धस्य पण्डितैः ॥
प्राकारकूटनलिकापुटकापृष्ठलक्षणम् ।
पृष्ठमार्गं भवेद्बन्धमर्धचन्द्रं सकम्बलम् ॥
भूमेर्वा चलने शक्र तत् प्रामं तोयसंयमम् ।
पाषाणघटितं वज्रमध्यं विदग्धकाष्ठजम् ॥
शिलास्तम्भनिबद्धं तु पृथुविस्तारसञ्चितम् ।
वज्रसन्धानसंयोगं समं वा वान्तकं परम् ॥
यथाकालसहं विद्वान् कुक्षिघातं तु कारयेत् ।
न मध्यहृदये घातं कम्बले वाऽपि दापयेत् ॥
महादोषकरं तत् तु द्वारीकस्य भयप्रदम् ।
प्रयत्नः कुहने कार्यो मृत्तिकाकूर्चनादिके ॥
नलिकास्तु प्रदातव्यं लोहं मुसलसङ्कितम् ।
समाप्तिपर्यन्तं यावदुपलान् घातयेन्नृप ॥
अन्यथा न भवेद्वाढा ग्रामदोषकरी भवेत् ।
पाली तस्माद्दृढां कुर्यात्समपृष्ठां न घट्टिताम् ॥

कूर्मवृषभमत्स्यादिहैमं चादौ विनिक्षिपेत् ।
प्रारम्भेऽस्या महापूजा श्येनकादिषु कारयेत् ॥
वारुणं नागदैवं तु यागमन्त्रजपं सदा ।
आनिष्पत्ति तु कर्तव्यमन्यथा भयदं भवेत् ॥
कर्तू राष्ट्रे जने शक झारी च न तदा भवेत् ।
दशार्थं प्रतिरूपाणि तथालिङ्गं विनायकम् ॥
शक्तिपूर्वाणि कुर्वीत महालक्ष्मीर्यथा पुरे ।
शुभदा भवने लोके तदा तीर्थं शिवं तथा ॥
आगमं तोरणं वापी कूपं वास्तुमहोत्सवम् ।
झारीबन्धेषु कर्तव्यमुत्सर्गं गोप्रदानिकम् ॥
गोसहस्रं शुभं देयं मही हैमं च दक्षिणाम् ।
श्येनकं नागयज्ञं च झारीबन्धे सदा शुभम् ॥
चतुस्तोरणसंयुक्तं पताकादिविभूषितम् ।
उत्सर्गं विहितं झार्यामन्यथा न शुभोदकम् ॥
शकटेन बलिर्देयः पशुपालपुरःसरम् ।
स्फुरन्तं नागद्वयं मन्त्रं तत्र प्रयोजयेत् ॥
संपूर्णं जायते सर्वं न्यूनाधिकफलं च यत् ।
फलं च हयमेधस्य यत् कृतस्य भवेदिह ॥
समग्रं लभते तस्य झारीबन्धे कृते सति ।
इह कीर्तिः शुभं सर्वं विशत्रुश्च भवेन्नृप ॥
झारीबन्धप्रकर्तारो नन्दन्ति प्रजया सह ।
तडागं मलकोपेतं परिवाहसमन्वितम् ॥
देवतायमसंयुक्तं सर्वकामप्रदायकम् ।
झारीबन्धे सुविस्तीर्णे परिवाहः शुभः सदा ॥

पश्चिमे सुभगा नाम तां यथोत्तरतस्तथा ।
न कुर्युर्वाम्ये नैर्ऋत्यामाग्नेय्यां तु शुभार्थिनः ॥
प्रदक्षिणेन पूर्वस्यां दीर्घिकाः शुभं सदा ।
अन्यथा कलहोद्वेगं मृत्युं वा लभते कृती ॥
तस्माद्राज्यायुःशुभदं पुत्रसन्ततिवर्द्धनम् ।
पश्चिमोत्तरपूर्वेण आरामं जायते कृतम् ॥
द्वारोपरम्यं शिलोपेतं शक्तिभिर्नायकैर्युतम् ।
तदा कूपजलाशयभूषितं सर्वकामदम् ॥
एवंविधं गुणोपेतं ब्रह्मसूर्यान्तकान्वितम् ।
कुर्याद्यः सुरशार्दूल स लभेदीप्सितं फलम् ॥
इह कीर्त्तिं शुभान् पुत्रान् परत्र परमां गतिम् ।
द्वारीबन्धात् फलं प्राप्य हयमेधसमं भवेत् ॥
समस्तपातकोच्छित्तिः कृते भवति देववत् ।
तस्मात्कूपेण कर्त्तव्यं विधिना द्वारिगं जलम् ॥
समन्त्रं शास्त्रदृष्टेन कर्मणा सफलं भवेत् ।
श्येनकादेस्तथा पूजा नागाद्धं हृदयं जपेत् ॥
द्वारीबन्धप्रसिद्ध्यर्थमन्यथा न लभेत् फलम् ।
यतः पुण्यैस्तु सिद्धेयत द्वारीबन्धः सुरोत्तम ॥
अतः पुण्यविधिः कार्यो जपहोमव्रतादिकः ।
द्वारीस्तोत्रसं कार्यं शिवस्यादेशतः शुभम् ॥
नागानां द्वारिसिद्ध्यर्थं मन्त्राकूपं भवेत् कृतम् ।
तद्धं पुण्या भवेद्द्वारी किन्तु संदेहसाधना ॥
कृता विशीर्यते कालात् तस्मात् कार्या सदा दृढा ।
द्वेषं पश्चिमयाम्यं तत्कर्त्तुर्मृत्युदं भवेत् ॥

जयं पश्चिमपूर्वेण रविपुत्रधनप्रदम् ।
याम्यसौम्यगतं रुग्णं पत्नीधनविनाशनम् ॥
षष्ठं वारुणगं मद्रराज्यायुःपुत्रदं मतम् ।
पूर्वोत्तरगतं देयं सुखदं धनदं मतम् ॥
पश्चिमे सप्तमं* मन्दं धनकोशविवर्धनम् ।
जलवायुगतं हैमं क्षेमदं च सवेदनम् ॥
रक्षो वायुगतं काकानुचाटं कुरुते धनम् ।
अग्निवारुणिकं दाहं दहनं कीर्तिवर्धनम् ॥
ऐशवारुणगतं पापं धनतापकरं तथा ।
वायुराहगतं दैत्यो धनक्षेमगजप्रदम् ॥
एवं लक्षणमाश्रित्य कर्तव्या नाम वाटिका ।
शुभावहा सदा कर्तुं राज्यायुःसुतवित्तदा ॥
वैपरीत्ये सदा लोके धनं कर्तुमेवावहम् ।
नृप राष्ट्रे जने दोषाश्च हन्याद्विधिना शुभम् ॥
सलक्षां कारयेद्वापीं गणमायसमन्विताम् ।
अयं च विजयं कार्यं सुष्ठु कुर्यात् सराष्ट्रकम् ॥
नागाख्यं हृदयं जप्त्वा प्रस्फुरत् स्थापने शुभम् ।
सेनाधिपाश्च देव्यश्च तर्पितव्याः पयोघृतैः ॥
वस्त्रैर्नानाविधैर्गन्धैः फलधूपनगादिभिः ।
कार्या महोत्सवो वाद्यैः पालीबन्धस्तदार्यैभिः ॥
दानं देयं सदा शक्त्या नृपराष्ट्रसुखावहम् ।
गोदानं भूमिदानं च कन्यादानं सुरोत्तम ॥

---

* मन्दं मन्दनं कोशवर्धनम् इति म॰ प॰ पु॰ पा॰ ।

वामदेव्यं बृहत् सौम्यं रौरवं सरथन्तरम् ।
गवां व्रतं त्रिकर्णं च रक्षोघ्नं च यशस्तथा ॥
गायन्ति सामगा राजन् पश्चिमद्वारमाश्रिताः ।

'वैराजं' 'पिबा सोममिन्द्रेत्यत्र' प्रसिद्धम्। 'शैपर्णानि' 'ऋतवेदभिश्रुता मधमित्यत्र' त्रीणि सामानि। 'कद्रुसंहिता' 'याको राजानमित्यादि' प्रसिद्धम्। 'श्यावम्' 'अश्वाते सामसम्बन्ध' इति प्रसिद्धम्। 'पञ्चनिधनं' वामदेव्यं 'कयानश्चित्रेत्यत्र' प्रसिद्धम्। गायत्रं तु प्रसिद्धम्। 'ज्येष्ठसामानि' 'ओषधाज्ञनोहानि' वामदेव्ये पार्श्वे गेयम्। 'बृहत् साम' त्वामिद्धि हवामह इति प्रसिद्धम्। 'सौम्यं' 'सोमवतं सन्ते पयांसीति' प्रसिद्धम्। 'रौरवं' 'पुनानः सोमेत्यत्र' प्रसिद्धम्। 'रथन्तरम्' 'अभि त्वा शूर नो नुम' इति प्रसिद्धम्। 'गवां व्रतं' 'तमन्नत प्रथममिति' द्वे सामनी। 'त्रिकर्णं' 'त्रिकादित्यत्र' प्रसिद्धम्। 'रक्षोघ्नं' 'पञ्चः साम बृहदिन्द्रायेत्यत्र' प्रसिद्धम्।

आथर्वणाश्चोत्तरतः शान्तिकं पौष्टिकं तथा ।
जपेरन् मनसा देवमाश्रिता वरुणं प्रभुम् ॥
पूर्वेद्युरर्चितो राजावेशं कृत्वाऽधिवासनम् ।
गजाश्वरथ्यावल्मीकसङ्गमह्रदगोकुलात् ॥
मृदमानीय कुण्डेषु प्रक्षिपेच्चत्वरात् तथा ।
रोचनां च ससिद्धार्थान् गन्धान् गुग्गुलमेव च ॥
स्नपनं तस्य कर्तव्यं पञ्चभङ्गसमन्वितैः ।
पूर्वं कर्तुर्महामन्त्रैरेवं कृत्वा विधानतः ॥

'रोचनां' गोरोचनाम्। 'सिद्धार्थान्' श्वेतसर्षपान्।

## पञ्चभङ्गाः ।

अश्वत्थोदुम्बरप्लक्षवटचूतस्य पल्लवाः ।

अभिषेकमन्त्रास्तुलापुरुषे द्रष्टव्याः। अभिषेकस्तु द्वितीयदिवसे विधेयः।

एवं कृत्वा तु सिद्धार्थं* विधियुक्तेन कर्मणा ।
ततः प्रभाते विमले सञ्जाते वा गवां शतम् ॥
ब्राह्मणेभ्यः प्रदातव्यमष्टषष्ट्यथ वा पुनः ।
पञ्चाशद्वाऽथ षट्त्रिंशत् पञ्चविंशति वा पुनः ॥

एता गावो दक्षिणा भवन्त्यः सम्पादिताः कर्माङ्गत्वेनताः प्रीयन्ताम्-इत्युदकपूर्वं दद्यात् ।

ततः साम्वत्सरे प्रोक्ते शुद्धे लग्ने सुशोभने ।
वेदशास्त्रैः सगान्धर्वैश्चान्यैश्च विविधैः शुभैः ॥
कनकालङ्कृतां कृत्वा तत्र गामवतारयेत् ।
सामगाय च सा देया ब्राह्मणाय विशां पते ॥

अथ गवानुमन्त्रणमन्त्रः ।

इदं सलिलं पवित्रं कुरुष्व शुद्धपूता अमृताः सन्तु नित्यम् ।
मां तारयन्ती कुरु तीर्थाभिषेकं लोकाल्लोकं तरते तीर्यते च-इति ॥

तत्पुच्छाग्रे यजमानः संतरणमाचरेत् ।

जलाशयं च त्रिवृता सूत्रेण परिवेष्टयेत् ।
पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ॥
ततो निक्षिप्य मकरं मत्स्यादींस्तांश्च सर्वशः ।
धृतां चतुर्भिर्विप्रैश्च वेदवेदाङ्गपारगैः ॥
महानदीजलोपेतां दध्यक्षतविभूषिताम् ।
उत्तराभिमुखो न्युब्जां जलमध्ये तु कारयेत् ॥
आथर्वणेन साम्ना च पुनर्मामित्यृचेति च ।
आपोहिष्ठेति मन्त्रेण क्षिप्त्वाऽऽगत्य च मण्डपम् ॥

'आथर्वणं साम' 'शन्नो देवीरभिष्टये' इति । अत्र पक्षिद्वयमत्स्ययोरयम् । यथा सर्व जलाशयः सर्वोपयोगित्वेन सर्वेभ्यो भूतेभ्यो मयोभूर्भवन इति त्यागं कुर्यात् ।

---

* एवं कृत्वा समतिश्चाद्ध इति म० प० पु० पा० ।

